# Shri Hanumana Stotram

# श्रीहनुमानस्तोत्रम्

## Document Information

Text title : Shri Hanumana Stotram

File name : hanumAnastotram.itx

Category : hanumaana, svAminArAyaNa, stotra, aShTaka

Location : doc_hanumaana

Acknowledge-Permission: Swaminarayan Sampradaya

Latest update : August 8, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 9, 2024

*sanskritdocuments.org*

# श्रीहनुमानस्तोत्रम्

नीतिप्रवीण ! निगमागमशास्त्रबुद्धे !
राजाधिराज रघुनायक मन्त्रीवर्य ! ।
सिन्दूरचर्चितकलेवर नैष्टिकेन्द्र !
श्री रामदूत ! हनुमन् ! हर सङ्कटं मे ॥ १॥

सीतानिमित्तजरघूत्तमभूरिकष्ट
प्रोत्सारणैककसहाय ! हतास्त्रपौघ ! ।
निर्दग्धयातुपतिहाटकराजधाने !
श्री रामदूत ! हनुमन् ! हर सङ्कटं मे ॥ २॥

दुर्वार्यरावणविसर्जितशक्तिघात
कण्ठासुलक्ष्मणसुखाहृतजीववल्ले ! ।
द्रोणाचलानयननन्दितरामपक्ष !
श्री रामदूत ! हनुमन् ! हर सङ्कटं मे ॥ ३॥

रामागमोक्तितरितारितबन्ध्वयोग
दुःखाब्धिमग्नभरतार्पितपारिबर्ह ! ।
रामाङ्घ्रीपद्ममधुपीभवदन्तरात्मन् !
श्री रामदूत ! हनुमन् ! हर सङ्कटं मे ॥ ४॥

वातात्मकेसरिमहाकपिराटतदीय
भार्याञ्जनीपुरूतपःफलपुत्रभाव ! ।
ताक्ष्योंपमोचितवपुर्बलतीव्रवेग !
श्री रामदूत ! हनुमन् ! हर सङ्कटं मे ॥ ५॥

नानाभिचारिकविसृष्टसवीरकृत्या
विद्रावणारुणसमीक्षणदुःप्रद्यर्ष्य ! ।
रोगघ्नसत्सुतदवित्तदमन्त्रजाप !
श्री रामदूत ! हनुमन् ! हर सङ्कटं मे ॥ ६॥

यन्नामधेयपदकश्रुतिमात्रतोऽपि
येब्रह्मराक्षसपिशाचगणाश्च भूताः ।
ते मारिकाश्च सभयं ह्यपयान्ति स त्वं !
श्री रामदूत ! हनुमन् ! हर सङ्कटं मे ॥ ७॥

त्वं भक्तमानसस मीप्सितपूर्तिशक्तो
दीनस्य दुर्मदसपत्नभयार्तिभाजः ।
ईष्टं ममापि परिपूरय पूर्णकाम !
श्री रामदूत ! हनुमन् ! हर सङ्कटं मे ॥ ८॥

इति श्रीहनुमानस्तोत्रं सम्पूर्णम् ।

---

*Shri Hanumana Stotram*

pdf was typeset on August 9, 2024

Please send corrections to *sanskrit@cheerful.com*